# स्वप्नवासवदत्तम्

कः) संस्कृतभाषया देवनागरीलिप्या च संक्षेपेण उत्तरं देयम्

१) किं खलु स्वप्नवासवदत्तम् नाटकस्य उत्सः ?

२)कः खलु 'स्वप्नवासवदत्तम्' नाटकस्य रचनाकारः ? तस्य रचनान्तराणां नाम लिखतु

३) अस्य नाटकस्य विदूषकस्य नाम किम् ?

४) महाकविभासेन विरचितयोः द्वयोः एकाङ्कनाटकयोः नाम लिख्यताम्

५) भासस्य रामायणमूलककानां नाटकानां नाम लिख्यताम्।

६) भासनाटकचक्रम् कुत्र केन वा आविष्कृतम् ?

७) पद्मावती का ? सा कथं तपोवनम् आगतवती?

८) ब्रह्मचारी कः ? सः कस्मात् स्थानात् कुत्र आगच्छत् ?

९) नाटकऽस्मिन् पद्मावती कीदृशी नायिका विद्यते ?

१०) इयं कस्य भगिनी विद्यते ?

११) स्वप्नवासवदत्त नाटकस्याङ्गीरसः कः विद्यते ?

१२) अवन्तीका का विद्यते ?

१३) सूत्रधारः कः भवति?

१४) वासवदत्तया सहतामुपसर्प्य यौगन्धरायणः किमुवाचम?

१५) वासवदत्ता किं नामौषधं तस्यां न गुम्फति

१६) पद्मावतीं चिन्तयत् राजा कुत्र गच्छति ?

१७)राजा स्वप्ने किमाचरिति ?

१८) वसुन्धराकाञ्चुकीयौ आगत्य राजानं किं कथयतः ?

१९) चित्रं दृष्टवैव पद्मावती किं स्मरति ?

२०) छद्मब्राह्मणवेषे यौगन्धरायणः आगत्यः कां याचते ?

२१) को अङ्गारवतीमहासेनौ ?

२२)केन प्रकारेण पद्मावती अवन्तिकायाः प्रकृतपरिचयः ज्ञातवती ?

२३) वासवदत्ता केन वीणावादनस्य शिक्षामलभत्

२४) वैदेहीपुत्रः कः अस्ति ?

२५)पुष्पकभद्रादिकाः के सन्ति ?

२६) कस्मिन्नङ्के पद्मावती शिरोवेदनया विनश्यति

२७) कस्मिन्मङ्के उदयनः स्वप्ने प्राप्तोति वासवदत्ताम्?

२८) घोषवती कुत्र लव्धाऽभवत?

२९) यौगन्धरायणः पद्मावत्याः सविधे किं याचतेस्म?

३०) न्यासस्य रक्षणं कीदृश भवति ?

ख) अधोलिखितेषु प्रश्नेषु समुचितम् उत्तरं ददातु

१)भाससमस्या का ? विषयऽस्मिन् संक्षिप्तटीका लिख्यताम्

२) स्वप्नवासवदत्तम् नाटकस्य प्रथमाङ्के ब्रह्मचारिणः प्रवेशेन यत् नाटकीयप्रयोजनं सिद्धं भवति , तस्य समीक्षात्मका आलोचना क्रीयताम्

३) स्वप्नवासवदत्तम् नाटके यौगन्धरायणस्य भूमिका आलोच्यताम्

४)किं खलु स्वप्नवासवदत्तम् नाटके विदूषकस्य नाम ? नाटकेऽस्मिन् विदूषकस्य चरित्रमालोच्यताम्

५) स्वप्नवासवदत्तम् नाटके प्रतिफलितं आदर्शप्रेमिकरूपेण तथा आदर्शभूपतिरूपेण राज्ञः उदयनस्य चरित्रमालोच्यताम्

६) स्वप्नवासवदत्तम् नाटकस्य पञ्चामाङ्कस्थितेन स्वप्नदृश्यस्यालोकेन नाटकस्य नामकरणस्य यथार्थ्यम् आलोच्यताम् ।

७) वासवदत्तापद्मावत्योः च चरित्रयोः सादृश्यं वैसादृश्यं च आलोच्यताम्

८) स्वप्नवासवदत्तम् इति नाटकस्य अन्तिमाङ्के प्राप्तं मिलनदृश्यं वर्ण्यताम्

ग) संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या

१) पूर्वं त्वयाप्यभिमतं गतमेवमासीच्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।

कालक्रमेण जगतः परिवर्तमाना चक्तारपङ्क्तिरिव गच्छति भाग्यपङ्क्ति

२) प्रद्वेषो वहुमानो वा संकल्पादुपजायते।

भर्तृदाराभिलाषित्वादस्यां मे महती स्वता

३) सुखमर्भो भवेद् दातुं सुखं प्राणाः सुखं तपः।

सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्

४)धन्या सा स्त्री यां तथा वेत्ति भर्ता|भतृस्नेहात् सा हि दग्धाप्यदग्धा

५) दुःखं त्यक्तुं वद्धमूलोऽनुरागः स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।

यात्रा तेषायद्विमुच्येह वाष्पंप्रास्तनृण्या याति बुद्धिः प्रसादम्

६) गुणानां च विशालानां सत्काराणां च नित्यशः।

कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः

७) यदि तावदयं स्वप्नो धन्यमप्रतिवोधनम्।

अथायं विभ्रमो वा स्याद् विभ्रमो ह्यास्तु मे चिरम्

८) कः कं शक्तो रक्षितुं मृत्युकाले

रज्जुच्छेदे के घटं धारयन्ति?

एवं लोकस्तुल्यधर्मो वनानां

काले काले छिद्यते रूह्यते च

९) सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः।

तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः

१०)इयं वाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत् ।

कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः